सामान्यानि गुणाः। तस्य द्रव्यस्योक्तरूपेण भवनमुत्पादः तद्भावः परिणामः पर्याय इति पर्यायाः यथा जीवस्य घटादिज्ञानसुखक्लेशादयः पुद्गलस्य मृत्पिण्डघटादयः धर्म्मादीनां गत्यादिविशेषाः अतएव षट् द्रव्याणीति प्रसिद्धिः।

केचन सप्त तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रव-बन्ध-संवर-निर्जर-मोक्षास्तत्त्वानीति। तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते। औदारिकादिकायादिचलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः यथा सलिलावगाहिद्वारं नद्यास्रवणं कारणत्वादास्रव इति निगद्यते तथा योगप्रणाड़िकयाकर्म्मास्रवतीति स योग आस्रवः। यथा आर्द्रं वस्त्रं समन्ताद्वातानीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म्म सर्व्वप्रदेशैर्गृह्णाति यथा वा निष्टप्तायःपिण्डे जले क्षिप्ते अम्भः समन्ताद्गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म्म समन्तादादत्ते। कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च स द्विविधः शुभाशुभभेदात्। तत्राहिंसादिः शुभः काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः। तदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्म्मयोगः स आस्रवः शुभः पुण्यस्य अशुभः पापस्येत्यादिना ग्रन्थसन्दर्भेण ससंरम्भमभाणि। अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रव इन्द्रियद्वारा हि पौरुषं ज्योतिर्व्विषयान् स्पृष्ट्वा रूपादिज्ञानरूपेण परिणमत इति।

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तानन्तप्रदेशानां पुद्गलानां कर्म्मबन्धयोग्यानामादानमुपश्लेषणं यत् करोति स बन्धः। तदुक्तं सकषायत्वाज्जीवः कर्म्मभावयोग्यान् पुद्गलानादत्ते स बन्ध इति। तत्र कषायग्रहणं सर्व्वबन्धहेतूपलक्षणार्थम्। बन्धहेतून् पपाठ वाचकाचार्य्यः। मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति। मिथ्यादर्शनं द्विविधं मिथ्याकर्म्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशजम्। पृथिव्यादिषट्कायादानकं षड़िन्द्रियासंयमनञ्च अविरतिः। पञ्चसमितिगुप्तिष्वनुत्साहः प्रमादः। कषायः क्रोधादिः। तत्र कषायान्ताः स्थित्यनुभावबन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः। बन्धश्चतुर्व्विध इत्युक्तं प्रकृतिस्थित्यनुभावप्रदेशास्तु तद्विधय इति यथा निम्बगुड़ादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमावरनीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्भोधरवत् प्रदीपप्रभातिरोधायककुम्भवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्ज्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मदमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रिकवद्गोत्रस्योच्चनीचकारित्वं कुम्भकारवद्दानादीनां विघ्ननिदानत्वमन्तरायस्य स्वभावः कोशाध्यक्षवत्। सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्म्मावान्तरभेदमूलप्रकृतिवेदनीयः। तथावोचदुमास्वातिवाचकाचार्य्यः आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तराया इति तद्भेदश्च समग्रहात् पञ्चनवाष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चदशभेदा यथाक्रममिति। एतच्च सर्व्वं विद्यानन्दादिभिर्व्विवृतमिति विस्तरभयान्न प्रस्तूयते। यथा अजागोमहिष्यादिक्षीराणामेतावन्तमनेहसं माधुर्य्यस्वभावादप्रच्युतिस्थितिः तथा ज्ञानावरणादीनां मूलप्रकृतीनामादितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटिकोट्यः परास्थितिरित्याद्युक्तं कालदुर्द्धीनवत् स्वीयस्वभावादप्रच्युतिस्थितिः। यथा अजागोमोहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्वकार्य्यकारणे सामर्थ्यविशेषोऽनुभावः तथा कर्म्मपुद्गलानां स्वकार्य्यकरणे सामर्थ्यविशेषोऽनुभावः। कर्म्मभावपरिणतपुद्गलस्कन्धानामनन्तान्तप्रदेशानामात्मप्रदेशानुप्रवेशः प्रदेशबन्धः। आस्रवनिरोधः संवरः। येनात्मनि प्रविशत् कर्म्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः। संसारकारणाद्योगादात्मनो गोपनं गुप्तिः। सा त्रिविधा कायवाङ्मनोनिग्रहभेदात्। प्राणिपीड़ापरिहारेण सम्यगयनं समितिः सा ईर्य्याभाषादिभेदात् पञ्चधा। प्रपञ्चितञ्च हेमचन्द्राचार्य्यैः।

लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः।
जन्तुरक्षार्थमालोक्य गतिरीर्य्या मता सताम्॥
आपद्य रागतः सर्व्वजनीनं मितभाषणम्।
प्रिया वाचंयमानां सा भाषा समितिरुच्यते॥
द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम्।
मुनिर्यदन्नमादत्ते सैषणासमितिर्म्मता॥
आसनादीनि संवीक्ष्य प्रतिलङ्घ्य च यत्नतः।
गृह्णीयान्निक्षिपेद्ध्यायेत् सादानसमितिः स्मृता॥
कफमूत्रमलप्रायैर्निर्व्वन्तु जगतीतले।
यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत्॥

अत एवास्रवः स्रोतसो द्वारं संवृणोतीति संवर इति निराहुः। तदुक्तमभियुक्तैः।

आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम्।
इतीयमार्हती मुष्टिरन्यदस्याः प्रपञ्चनम्॥

अर्ज्जितस्य कर्म्मणस्तपःप्रभृतिभिर्निर्ज्जरणं निर्ज्जराख्यं तत्त्वं चिरकालप्रवृत्तकषायकलापं पुण्यं सुखदुःखे च देहेन जरयति नाशयति केशोल्लुञ्चनादिकं तप उच्यते। सा निर्ज्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्ज्जरा कामादिपाकजेति च जेगीयते। यत् कर्म्म तपोबलात् स्वकामनयोदयावलिं प्रवेश्य प्रपद्यते तत् कर्म्म निर्ज्जरा। यदाह।

संसारबीजभूतानां कर्म्मणां जरणादिह।
निर्ज्जरा संस्मृता द्वेधा सकामा कामनिर्ज्जरा॥
स्मृता सकामा यमिनामकामा त्वन्यदेहिना-
मिति॥

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः अभिनवकर्म्माभावात् निर्ज्जराहेतुसन्निधानेनार्ज्जितस्य कर्म्मणो निरसनादात्यन्तिककर्म्ममोक्षणं मोक्षः बन्धहेतुभवहेतुनिर्ज्जराभ्यां कृत्स्नकर्म्मविप्रमोक्षनं मोक्ष इति तदनन्तरमूर्द्ध्वं गच्छत्यालोकान्तात् यथा हस्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्बलादेवासंस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये बहुशो यत् कृतं प्रणिधानं मुक्तस्य तदभावेऽपि पूर्व्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा मृत्तिकालेपकृतमलाबुद्रव्यं जलेऽधःपतति पुनरपेतमृत्तिकाबन्धमूर्द्ध्वं गच्छति तथा कर्म्मरहित आत्मा असङ्गत्वादूर्द्ध्वं गच्छति बन्धच्छेदादेरण्डबीजवच्चोर्द्ध्वगतिस्वभावाच्चाग्निशिखावत्। अन्योन्यं प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः। तदुक्तं पूर्व्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गतिपरिणामाच्चाविरुद्धं कुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्चेति। अतएव पठन्ति।

गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्य्यादयो ग्रहाः।
अद्यापि न निवर्त्तन्ते त्वालोकाकाशमागताः—
इति।

अन्ये तु गतसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मुक्तिरित्यास्थिषत। एवमुक्तानि सुखदुःखसाधनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः। तदुक्तं सिद्धान्ते जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्ज्जरणं बन्धो मोक्षश्च नव तत्त्वानीति। संग्रहे प्रवृत्ता वयमुपरताः स्म।

अत्र सर्व्वत्र सप्तभङ्गिनयाख्यं न्यायमवतारयन्ति जैनाः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति तत्सर्व्वमनन्तवीर्य्यः प्रत्यपीपदत्।

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥
क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक्।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥
आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः॥
समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यत इति।

स्याच्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः। यथोक्तम्।

वाक्येष्वनेकान्तद्योतिगम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक इति॥

यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा